SUBJECT- SANSKRIT(H)

COURSE CODE-AHSNS202C-4

COURSE TITLE- CLASSICAL SANSKRIT LITERATUE(DRAMA)

COURSE TOPIC- SWAPNAVĀSAVADATTAM

(स्वप्नवासवदत्तम्)

**प्रदेषो वहुमानो वा संकल्पादुपजायते।**

**भर्तृदाराभिलाषित्वादस्यां मे महती स्वता।।1/7।।**

महाकविभासेन विरचितं स्वप्नवासवदत्तमिति नाटकम्। तस्मिन्नाटके दृश्यते श्लोकऽयम्।

यदा काञ्चुकीयः यौगन्धरायनम् अकथयत् यत्, पद्मावती अतीव धर्मप्रिया, तापसेभ्यश्च धनानि दातुमिच्छति, तदा यौगन्धरायनः मनसा चिन्तितं श्लोकऽयम्।

प्रदेषः वहुमानः वा संकल्पाद् उपजायते, भर्तृदाराभिलाषित्वाद् अस्याम् मे महती स्वता।

प्रदेषः घृणा। वहुमानः अभिमानः आदरः वा। वा अथवा। संकल्पाद् मनोव्यापारः। उपजायते उत्पद्यते। भर्तृदाराभिलाषित्वाद् भर्त्तुः दारा भर्तृदाराः भावप्रधानो निर्देशः। तस्य अभिलासत्वं भर्त-दाराभिलाषित्वमिति भावः।अस्याम् पद्मावत्याः । मे मम, यौगन्धरायनस्य। महती वुद्धिः मतिः वा। स्वता आत्मीया।

षडेन्द्रियेषु अन्यतमः मनः। मनसा एव सर्वमनुभुयते।यद् मनसानुभुयते तदेव कार्यानि प्रायशः कुर्वन्ति मानवाः। अतः मनसा एव अनुरागः जायते विरक्तिः वा। तथैव जायते इच्छा।सा इच्छा दुःखं भवति कदापि वा सुखम्। यदा सुखं भवति तदानन्दमनुभुयते। तादृशी स्थिति दृश्यते यौगन्धरायनस्य।

तस्येच्छा आसीत् पद्मावती उदयनस्य पत्नी भवेदिति।कारणं त्वां प्रति यौगन्धरायनस्य महती आत्मीयतासीत्।सः एव आत्मीयः भवति, येन सह आत्मनः मिलनमुपलभ्यते इति सारः।

अनपष्टुप् वृत्तम् अर्थान्तरन्यासोऽलंकारश्च दरीदृश्यते अस्मिन् श्लोके।